# pANinIya shikShA

# પાણિનીય શિક્ષા

## Document Information

Text title : pAninIya shikShA

File name : pANinIyashikShA.itx

Category : major_works, svara

Location : doc_z_misc_major_works

Transliterated by : Pramod Kulkarni auddhav at gmail.com

Proofread by : Pramod Kulkarni auddhav at gmail.com

Latest update : September 10, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

pANinIya shikShA

# પાણિનીય શિક્ષા

અથ શિક્ષાં પ્રવક્ષ્યામિ પાણિનીયં મતં યથા ।
શાસ્ત્રાનુપૂર્વં  તદ્વિદ્યાદ્યથોક્તં લોકવેદયોઃ ॥ ૧॥

પ્રસિદ્ધમપિ શબ્દાર્થમવિજ્ઞાતમબુદ્ધિભિઃ ।
પુનર્વ્યક્તીકરિષ્યામિ વાચ ઉચ્ચારણે વિધિમ્ ॥ ૨॥

ત્રિષષ્ટિશ્ચતુઃષટ્ટિર્વા વર્ણાઃ શમ્ભુમતેમતાઃ ।
પ્રાકૃતે સંસ્કૃતે ચાપિ સ્વયં પ્રોક્તાઃ સ્વયમ્ભુવા ॥ ૩॥

સ્વરા વિંશતિરેકશ્ચ સ્પર્શાનાં પઞ્ચવિંશતિઃ ।
યાદયશ્ચ સ્મૃતા હ્યષ્ટૌ ચત્વારશ્ચ યમાઃ સ્મૃતાઃ ॥ ૪॥

અનુસ્વારો વિસર્ગશ્ચ ઁ ક-પૌ ચાપિ પરાશ્રિતૌ ।
દુઃસ્પૃષ્ટો ચાપિ વિજ્ઞેયો ૡકારો પ્લુત એવ સઃ ॥ ૫॥  ॥૧॥

આત્મા બુદ્ધ્યા સમેત્યાર્થાન્મનો યુઙ્ક્તે વિવક્ષયા ।
મનઃ કાયાગ્નિમાહન્તિ સઃ પ્રેરયતિ મારુતમ્ ॥ ૬॥

મારુસ્તૂરસિચરન્મન્દ્રં જનયતિ સ્વરમ્ ।
પ્રાતઃસવનયોગં તં છન્દો ગાયત્રમાશ્રિતમ્ ॥ ૭॥

કણ્ઠે માધ્યન્દિનયુગં મધ્યમં ત્રૈષ્ટુભાનુગમ્ ।
તારં તાર્તીયસવનં શીર્ષણ્યં જાગતાનુગતમ્ ॥ ૮॥

સોદીર્ણો મૂર્ધ્ન્યભિહતો વક્ત્રમાપદ્ય મારુતઃ ।
વર્ણાઞ્જનયતે તેષાં વિભાગઃ પઞ્ચધા સ્મૃતઃ ॥ ૯॥

સ્વરતઃ કાલતઃ સ્થાનાત્પ્રયત્નાદનુપ્રદાનતઃ ।
ઇતિ વર્ણવિદઃ પ્રાહુર્નિપુણં તન્નિબોધત ॥ ૧૦॥  ॥૨॥

ઉદાતાનુદાત્તશ્ચ સ્વરિતશ્ચ સ્વરાસ્ત્રયઃ ।
હ્રસ્વો દીર્ઘઃ પ્લુત ઇતિ કાલતો નિયમા અચિ ॥ ૧૧॥

ઉદાત્તે નિષાદગાન્ધારાવનુદાત્ત ઋષભધૈવતૌ ।
સ્વરિત્પ્રભવા હ્યેતે ષડ્જમધ્યમપઞ્ચમાઃ ॥ ૧૨॥

અષ્ટૌ સ્થાનાનિ વર્ણાનામુરઃ કણ્ઠઃ શિરસ્તથા ।
જિહ્વામૂલં ચ દન્તાશ્ચ નાસિકોષ્ઠૌ ચ તાલુ ચ ॥ ૧૩॥

ઓભાવશ્ચ વિવૃત્તિશ્ચ શષસા રેફ એવ ચ ।
જિહ્વામૂલમુપધ્મા ચ ગતિરષ્ટવિધોષ્મણઃ ॥ ૧૪॥

યયોભાવપ્રસમુકારાદિપરં પદમ્ ।
સ્વરાન્તં તાદૃશં વિદ્યાદન્યદ્વ્યક્તમૂષ્મણઃ ॥ ૧૫॥ ॥૩॥

હકારં પઞ્ચમૈર્યુક્તમન્સ્થાભિશ્ચ સંયુતમ્ ।
ઔરસ્યં તં વિજાનીયાત્કઠ્યમાહુરસંયુતમ્ ॥ ૧૬॥

કણ્ઠ્યાવહાવિચુયશાસ્તાલવ્યા ઓષ્ઠજાવુપૂ ।
સ્યુર્મૂર્ધન્યા ઋટુરષા દન્ત્યા ઌતુલસાઃ સ્મૃતાઃ ॥ ૧૭॥

જિહ્વામૂલે તુ કુઃ પ્રોક્તો દન્ત્યોષ્ઠો વઃ સ્મૃતો બુધૈઃ ।
એઐ તુ કણ્ઠતાલવ્યા ઓઔ તુ કણ્ઠોષ્ઠજૌ સ્મૃતૌ ॥ ૧૮॥

અર્ધમાત્રા તુ કણ્ઠ્યા સ્યાદેકારૈકારયોર્ભવેત્ ।
ઓકારૌકારયોર્માત્રા તયોર્વિવૃતસંવૃતમ્ ॥ ૧૯॥

સંવૃતં માત્રિકં જ્ઞેયં વિવૃતં તુ દ્વિમાત્રિકમ્ ।
ઘોષા વા સંઋતાઃ સર્વે અઘોષા વિવૃતઃ સ્મૃતાઃ ॥ ૨૦॥ ॥૪॥

સ્વરાણામૂષ્મણાં ચૈવ વિવૃતં કરણં સ્મૃતમ્ ।
તેભ્યોઽપિ વિવૃતાવેઙૌ તાભ્યામૈચો તથૈવ ચ ॥ ૨૧॥

અનુસ્વાર યમાનાં ચ નાસિકા સ્થાનમુચ્યતે ।
અયોગવાહા વિજ્ઞેયા આશ્રયસ્થાનભાગિનઃ ॥ ૨૨॥

અલાબુવીણાનિર્ઘોષો દન્તમૂલ્યસ્વરાનનુ ।
અનુસ્વારસ્તુ કર્તવ્યો નિત્યમ્ હોઃ શષસેષુ ચ ॥ ૨૩॥

અનુસ્વારે વિવૃત્યાં તુ વિરામે ચાક્ષરદ્વયે ।
દ્વિરોષ્ઠ્યૌ તુ વિગૃહ્ણીયાદ્યત્રોકારવકારયોઃ ॥ ૨૪॥

વ્યાઘ્રી યથા હરેત્પુત્રાન્દન્તાભ્યાં ન તુ પીડયેત્ ।
ભીતા પતનભેદાભ્યાં તદ્વદ્વર્ણાન્પ્રયોજયેત્ ॥ ૨૫॥ ॥૫॥

યથા સૌરાષ્ટ્રિકા નારી તક્રઁ ઇત્યભિભાષતે ।
એવમ્ રઙ્ગાઃ પ્રયોક્તવ્યાઃ ખે અરાઁ ઇવ ખેદયા ॥ ૨૬॥

રઙ્ગવર્ણં પ્રયુઞ્જીરન્નો ગ્રસેત્પૂર્વમક્ષરમ્ ।
દીર્ઘસ્વરં પ્રયુઞ્જીયાત્પશ્ચાન્નાસિક્યમાચરેત્ ॥ ૨૭॥

હૃદયે ચૈકમાત્રસ્ત્વર્ધમાત્રસ્તુ મૂર્ધનિ ।
નાસિકાયાં તથાર્ધં ચ રઙ્ગસ્યૈવં દ્વિમાત્રતા ॥ ૨૮॥

હૃદયાદુત્કરે તિષ્ઠન્કાંસ્યેન સમનુસ્વરમ્ ।
માર્દવં ચ દ્વિમાત્રં ચ જઘન્વાઁ ઇતિ નિદર્શનમ્ ॥ ૨૯॥

મધ્યે તુ કમ્પયેત્કમ્પમુભૌ પાર્શ્વૌ સમૌ ભવેત્ ।
સરઙ્ગં કમ્પયેત્કમ્પં રથીવેતિ નિદર્શનમ્ ॥ ૩૦॥

એવં વર્ણાઃ પ્રયોક્તવ્યા નાવ્યક્તા ન ચ પીડિતાઃ ।
સમ્યગ્વર્ણપ્રયોગેન બ્રહ્મલોકે મહીયતે ॥ ૩૧॥ ॥૬॥

ગીતી શીઘ્રી શિરઃકમ્પી તથા લિખિતપાઠકઃ ।
અનર્થજ્ઞોઽલ્પકણ્ઠશ્ચ ષડેતે પાઠકાધમાઃ ॥ ૩૨॥

માધુર્યમક્ષરવ્યક્તિઃ પદચ્છેદસ્તુ સુસ્વરઃ ।
ધૈર્યં લયસમર્થં ચ ષડેતે પાઠકા ગુણાઃ ॥ ૩૩॥

શઙ્કિતં ભીતમુત્કૃષ્ટમવ્યક્તમનુનાસિકમ્ ।
કાકસ્વરં શિરસિ ગતં તથ સ્થાનવિવર્જિતમ્ ॥ ૩૪॥

ઉપાંશુ દષ્ટં ત્વરિતં નિરસ્તં  વિલમ્બિતં ગદ્ગદિતં પ્રગીતમ્ ।
નિષ્પીડિતં ગ્રસ્તપદાક્ષરં ચ વદેન્ન ન દીનં ન તુ સાનુનાસ્યમ્ ॥ ૩૫॥

પ્રાતઃ પઠેન્નિત્યમુરઃસ્થિતેન સ્વરેણ શાર્દૂલરુતોપમેન ।
મધ્યન્દિને કણ્ઠગતેન ચૈવ ચક્રાહ્વસઙ્કૂજિતસન્નિભેન ॥ ૩૬॥

તારં તુ વિદ્યાત્સવનં તૃતીયં શિરોગતં તચ્ચ સદા પ્રયોજ્યમ્ ।
મયૂરહંસાન્યમૃતસ્વરાણાં તુલ્યેન નાદેન શિરઃસ્થિતેન ॥ ૩૭॥ ॥૭॥

અચોઽસ્પૃષ્ટા ગણસ્ત્વીષન્નમસ્પૃષ્ટા શલઃ સ્મૃતાઃ ।
શેષાઃ સ્પૃષ્ટા હલઃ પ્રોક્તાનિબોચાનુપ્રદાનતઃ ॥ ૩૮॥

ઞમોનુનાસિકા નહ્રૌ નાદિનો હઝષઃ સ્મૃતાઃ ।

ઈષન્નાદા યણો જશ્ચ શ્વાસિનસ્તુ ખફાદયઃ ॥ ૩૯॥

ઈષત્છ્વાસાંશ્ચરો વિદ્યાદ્ગોર્ધામૈતત્પ્રચક્ષતે ।
દાક્ષીપુત્રઃ પાણિનિના યેનેદં વ્યાપિતં ભુવઃ ॥ ૪૦॥

છન્દઃ પાદૌ તુ વેદસ્ય હસ્તઃ કલ્પોઽથ પઠ્યતે ।
જ્યોતિષામયનં ચક્ષુર્નિરુક્તં શ્રોત્રમુચ્યતે ॥ ૪૧॥

શિક્ષા પ્રાણં તુ વેદસ્ય મુખં વ્યાકરણં સ્મૃતમ્ ।
તસ્માત્સાઙ્ગમધીત્યેવ બ્રહ્મલોકે મહીયતે ॥ ૪૨॥ ॥૮॥

ઉદાત્તમાખ્યાતિ વૃષોઽઙ્ગુલીનાં પ્રદેશિનીમૂલનિવિષ્ટમૂર્ધા ।
ઉપાન્તમધ્યે સ્વરિતં ધૃતં ચ કનિષ્ઠિકાયામનુદાત્તમેવ ।૪૩॥
ઉદાત્તં પ્રદેશિનીં વિદ્યાત્પ્રચયો મધ્યતોઽઙ્ગુલીમ્ ।
નિહતં તુ કનિષ્ઠિક્યાં સ્વરિતોપકનિષ્ઠિકામ્ ॥ ૪૪॥

અન્તોદાત્તમાદ્યુદત્તમુદાત્તમનુદાતં નીચસ્વરિતમ્ ।
મધ્યોદાત્તં સ્વરિતં દ્વ્યુદાત્તં ત્ર્યુદાત્તમિતિ નવપદશય્યા ॥ ૪૫॥

અગ્નિઃ બોમઃ પ્રવો વીર્યં હવિષં સ્વર્બૃહસ્પતિરિન્દ્રાબૃહસ્પતી ।
અગ્નિરિત્યન્તોદાત્તં સોમ ઇત્યાદ્યુદત્તં પ્રેત્યુદાત્તં દીર્ઘં નીચસ્વરિતમ્ ॥ ૪૬॥

હવિષાં મધ્યોદાત્તંસ્વરિતિ સ્વરિતં બૃહસ્પતિરિતિ ।
દ્વ્યુદાત્તમિન્દ્રાબૃહસ્પતી ઇતિ ત્રુદાત્તમ્ ॥ ૪૭॥

અનુદાત્તો હૃદિ જ્ઞેયો મૂર્ધ્ન્યુદાત્ત ઉદાહૃતઃ ।
સ્વરિતઃ કર્ણમૂલીયઃ સર્વાસ્યે પ્રચયઃ સ્મૃતઃ ॥ ૪૮॥ ॥૯॥

ચાષસ્તુ વદતે મારાં દ્વિમાત્રો ચૈવ વાયસઃ ।
શિખી રૌતિ ત્રિમાત્રસ્તુ નકુલસ્ત્વર્ધમાત્રકઃ ॥ ૪૯॥

કુતીર્થાદાગતં દગ્ધમપવર્ણં ચ ભક્ષિતમ્ ।
ન તસ્ય પઠે મોક્ષોઽસ્તિ પાપાર્હરિવ કિલ્બિષાત્ ॥ ૫૦॥

સુતિર્થદાગતં વ્યક્તં સ્વામ્નાય્યં સુવ્યવસ્થિતમ્ ।
સુસ્વરેણ સુવક્ત્રેણ પ્રયુક્તં બ્રહ્મ રાજતે ॥ ૫૧॥

મન્ત્રો હીનઃ સ્વરતો વર્ણતો વા મિથ્યાપ્રયુક્તો ન તદર્થમાહ ।
સ વગ્વજો યજમાનં હિનસ્તિ યથેન્દ્રશત્રુઃ સ્વરતોઽપરાધાત્ ॥ ૫૨॥

અનક્ષરં હતાયુષ્યં વિસ્વરં વ્યાધિપીડિતમ્ ।

અક્ષતા શસ્ત્રરૂપેણ વજ્રં પતતિ મસ્તકે ॥ ૫૩॥

હસ્તહીનં તુ યોઽધીતે સ્વરવર્ણવિવર્જિતમ્ ।
ઋગ્યજુઃસામભિર્દગ્ધો વિયોનિમધિગચ્છતિ ॥ ૫૪॥

હસ્તેન વેદં યોઽધીતે સ્વરવર્ણાર્થસંયુતમ્ ।
ઋગ્યજુઃસામભિઃ પૂતો બ્રહ્મલોકે મહીયતે ॥ ૫૫॥ ॥૧૦॥

શઙ્કરઃ શઙ્કરીં પ્રાદાદ્દાક્ષીપુત્રાયધીમતે ।
વાઙ્મયેભ્યઃ સમાહૃત્ય દેવીં વાચમિતિ સ્થિતિઃ ॥ ૫૬॥

યેનાક્ષરસમામ્નાયમધિગમ્ય મહેશ્વરાત્ ।
કૃત્સ્નં વ્યાકરણં પ્રોક્તં તસ્મૈ પાણિનયે નમઃ ॥ ૫૭॥

યેન ધૌતા ગિરઃ પુંસાં વિમલૈઃ શબ્દવારિભિઃ ।
તમશ્ચાજ્ઞાનજં ભિન્નં તસ્મૈ પાણિનયે નમઃ ॥ ૫૮॥

અજ્ઞાનાન્ધસ્ય લોકસ્ય જ્ઞાનાઞ્જનશલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ પાણિનયે નમઃ ॥ ૫૯॥
ત્રિનયનમભિમુખનિઃસૃતામિમાં
    ય ઇહ પઠેત્પ્રયતશ્ચ સદા દ્વિજઃ ।
સ ભવતિ ધનધાન્યપશુપુત્રકીર્તિમા-
    નતુલં ચ સુખં સમશ્નુતે દિવીતિ દિવીતિ ॥ ૬૦॥ ॥ ૧૧॥

અથ શિક્ષામાત્મોદાત્તશ્ચ હકારં સ્વરાણાં યથા
ગીત્યચોઽસ્પૃષ્ટોદાત્તં ચાષસ્તુ શઙ્કર એકાદશ ॥

॥ ઇતિ વેદાઙ્ગનાસિકા અથવા પાણિનીયશિક્ષા સમાપ્તા ॥

Encoded and proofread by Pramod Kulkarni auddhav at gmail.com

*pANinIya shikShA*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*